## श्रुशृणुपॄकृवृभ्यश्छन्दसि । (१०२/३६६१)

श्रु शृणु पॄ कृ वृ इत्येतेभ्य उत्तरस्य हेः [1]धिरादेशो भवति छन्दसि विषये । 'श्रुधी हवमिन्द्र[2]' (ऋ. २. ११. ३) । 'शृणुधी[3] गिरः' (ऋ. ८. १३. ७) । 'पूर्धि[4]' (ऋ. ८. ७८. १०) । 'उरु णस्कृधि' (ऋ. ८. ५७. ११)[5] । 'अपा वृधि' (ऋ. १.७.६) । शृणुधि इत्यत्र धिभावविधानसामर्थ्याद् उतश्च प्रत्ययात्[6] (६.४.१०६/२३३४) इति हेर्लुक् न भवति । 'अन्येषामपि दृश्यते' (६. ३. १३७/३५३९) इति दीर्घत्वम् । अतोऽन्यत्र 'व्यत्ययो बहुलम्' (३. १. ८५/३४३३) इति शप्, तस्य 'बहुलं छन्दसि' (२.४.७३/३४००) इति लुक् ॥

## अङितश्च । (१०३/३६६३)

अङितश्च हेर्धिरादेशो भवति[7] । 'वा छन्दसि' (३.४.८८/३१५२) इति पित्वेना[8]स्य अङित्त्वम् । 'सोमं रारन्धि' (ऋ. १.९१. १३) । 'अस्मभ्यं तद्धर्यश्व प्रयन्धि' (ऋ. ३. ३६. ९) । 'युयोध्यस्मज्जुहुराणमेनः' (ऋ. १. १८९. २०) । अङितः इति किम् ? 'हव्यं प्रीणीहि' (काठ. सं. ४०. ९४) । रारन्धि इति रमेर्व्यत्ययेन परस्मैपदम्, शपः श्लु, अभ्यासदीर्घत्वं छान्दसत्वात् । मलोपाभावस्तु अङित्त्वादेव । प्रयन्धि इति यमेःशपो लुक् । युयोधि इति [9]यौतेः शपः श्लुः ॥

## चिणो लुक् । (१०४/२३२०)

चिण उत्तरस्य प्रत्ययस्य लुग् भवति । अकारि । अहारि । अलावि । अपाचि । अकारितराम्, अहारितमाम् इत्यत्र तलोपस्य असिद्धत्वात् तरप्तमपोर्न लुग् भवति । चिणो लुक् इत्येतद् विषयभेदाद् भिद्यते ॥

## अतो हेः । (१०५/२२००)

अकारान्तादङ्गादुत्तरस्य हेः लुग् भवति । पच । पठ । गच्छ । धाव । अतः इति किम् ? युहि । रुहि । तपरकरणं किम् ? लुनीहि । पुनीहि । ईत्वस्यासिद्धत्वा[10]दकार एव भवति ॥

## उतश्च प्रत्ययादसंयोगपूर्वात् । (१०६/२३३४)

उकारो योऽसंयोगपूर्वः तदन्तात् प्रत्ययादुत्तरस्य हेर्लुक् भवति । चिनु । सुनु । कुरु । उतः इति किम् ? लुनीहि । पुनीहि । प्रत्ययात् इति किम् ? युहि । रुहि । असंयोगपूर्वात् इति किम् ? प्राप्नुहि । राध्नुहि । [11]तक्ष्णुहि ।

[७८८] उतश्च प्रत्ययाच्छन्दोवावचनम् । (म.भा. ३. २१५)

उतश्च प्रत्ययादित्यत्र छन्दसि [12]वा इति वक्तव्यम् । आतनुहि यातुधानान् । '[13]धिनुहि यज्ञपतिम्' (काठ. सं. १.६) । 'तेन मा भगिनं कृणु' (अ.वे. ६.१२९.१) ॥

---

1. धिभावः फ. 2. इन्द्र नास्ति ब.इ. 3. शिरः क. 4. चक्षुः इत्यधिकम् ह. 5. नश्च धातुस्थोरुष्ठभ्यः इति णत्वम् इत्यधिकम् ह. 6. असंयोगपूर्वात् इत्यधिकम् फ. ह. 7. छन्दसि विषये इत्यधिकम् फ. 8. तस्य फ. 9. यौवेः ह. 10. अकारान्तमेतत् फ.ह. 11. नास्ति फ. 12. च फ. 13. धिनुहि यज्ञम् फ.ह.